श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ यमकस्तबकः चतुर्दशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ यमकस्तबकः चतुर्दशः ॥

यशस्विनीमुपासीय यदुनाथसधर्मिणीम्।
यमकं कथयन्त्यार्या यत्पदं कल्पशाखिनः॥ **14.1** ॥

दयासंपूर्णहृदया मया कृतमनामया।
रमा गुणेन परमा स्तवं गृह्णातु वास्तवम्॥ **14.2** ॥

मातस्त्वदङ्घ्रौ मम देहि भक्तिं
 माऽतः परस्मिन् हृदयं प्रसाङ्क्षीत्।
सा कंसशत्रोर्दयिते शुभेन
 साकं चरीकर्त्यशुभप्रशान्तिम्॥ **14.3** ॥

रमाऽरमापत्तिमपास्यतां मे
 दयोदयोपेक्षितभक्तमन्तुः।
मुदामुदारां च दिशेत् समृद्धिं
 नतानतापान् कुरुते यदीक्षा॥ **14.4** ॥

रमे पदाब्जे तव ते मनोरमे
 नमेयमुच्चैरितरा गतिर्न मे।
सुरेश्वरो यद्भजनेन भासुरे
 पदे पुना राजति दैत्यलोपदे॥ **14.5** ॥

उदारविभवा भवामयहरा
 हरादिमहिता हिताय कमला।

सुधौघसदृशा दृशा शुभदया
　　दयालुरधुना धुनातु दुरितम्॥ **14.6**॥

घनाघनाभस्य घनाघनाशिनः
　　सदा सदाशारसदा सदार्द्र्यधीः।
हिताहिताक्ष्यां रहिताहिता मनो -
　　रमेऽरमेवाचर मे रमे मुदम्॥ **14.7**॥

सरोरुहारामगृहां सुमल्लिका -
　　सरोरुहारां कमलां मधुद्विषः।
भुजान्तरामोदकरीं नुमः क्षमा
　　भुजां तरामोऽनुसृतिं व्यथाम्बुधिम्॥ **14.8**॥

नृपो निरास्थः सुमनोजने यो
　　मनोजनेयो न हि तेन मेऽर्थः।
स्थितां प्रणम्यासमुरस्यहं तु
　　मुरस्य हन्तुः स्वयमिन्दिरे त्वाम्॥ **14.9**॥

दृष्टिर्दयैकावनि ते रमे नः
　　छिनत्तु विष्णोर्वनितेऽरमेनः।
भवं तवास्येयमपीडनेन
　　कुतः क्षतिर्मे यमपीडनेन॥ **14.10**॥

कुभूभुजां सम्प्रति माननेन
　　फलं सुधांशुप्रतिमानने न।
शुभं प्रयच्छाविकलं कलेश -
　　स्वसस्त्वहं स्यां विकलङ्कलेशः॥ **14.11**॥

करोतु मोदं कमला समुन्मिषत् -
　　कलाविलासा रसिनी विभावसौ।

कृपानिधौ वेङ्कटशैलनायके
    कलाविला सारसिनी विभावसौ ॥ **14.12** ॥

योगाय यो गायति भावुकेन
    रामे वरामेव हरेस्तवाख्याम्।
नालीक नालीक सवित्रि धाम
    तेनाक्षतेनाक्षयमाप्यते तत् ॥ **14.13** ॥

नृणां दृशः सार्थयितुं तवाभूत्
    रमे यदेहा नरमेयदेहा।
प्राप्ता तदा त्वं फणिराजशैल -
    वनालिकेलां नवनालिकेराम् ॥ **14.14** ॥

त्वयाश्रितस्यात्र परत्र चोच्चै -
    रकारि रामे नरकारिरामे।
गोपालकं त्वं नयसे रसं या
    गवा समेतं नगवासमेतम् ॥ **14.15** ॥

शुद्धया त्वदभिधासहस्रकं
    यो गिरा जपति ना समन्ततः।
त्वं विदुर्हरिसखि त्रयीविदो
    योगिराजपतिना समं ततः ॥ **14.16** ॥

दानश्रिया विहसितामरसालये तां
    तापापहां जननि तामरसालये ताम्।
पादद्वयीं स हि भजेद्रुचिरागमां ते
    यस्यास्ति निर्मलधियो रुचिरागमान्ते ॥ **14.17** ॥

वशितसर्वजगत्पतिरक्षया
    दृगशुभं तव लुम्पति रक्षया।

हृदयमुज्झतु देवि न मामकं
    त्वदिनमन्यमितो विनमाम कम्॥ **14.18**॥

त्यजति यच्छुभलाभवती न तान्
    जननि मत्प्रभृतीन् भवती नतान्।
मिलति मे न यथा मतिरंहसा
    मम तथा दयतामतिरंहसा॥ **14.19**॥

पद्मेऽस्तु तुभ्यं प्रथमा नमस्या
    स्थिरं फलं हि प्रथमानमस्याः।
विधाय मान्यामहतामहं तां
    हराम्यरीणां महतामहन्ताम्॥ **14.20**॥

भवत्यजेयं तनुतेऽजसेव्या
    जनाय लोकं दययैव तं श्रीः।
भवत्यजे यं तनुतेजसे व्या -
    ध्यघोज्झितं मे कुहृदेऽपि दत्ते॥ **14.21**॥

निधाय भवती दृशं नवसरोजपत्त्रायतां
    श्रितं हरिपुरन्ध्रि मां हृतनमद्विपत् त्रायताम्।
न मां किल विना त्वयाऽवति तमः कदम्बादयः
    कठोरहृदयो हरिःखलजनेऽस्मदम्बादयः॥ **14.22**॥

न स माधवस्तव गुणानसमा -
    यतनेत्र एव कमलायतने।
क्षमतेऽभिधातु मतिदक्षमतेः
    स्तवनाय कः पटुमतिस्तव ना॥ **14.23**॥

भवती जगदम्ब कृतार्तभवो -
    परमा परमा परमा परमा।

कुहृदोऽद्रितटीमवनाय कृपा -
    महिता महिता महिता महिता ॥ 14.24 ॥

रमा रमा रमा रमाध्युपासितं यमर्णवात्।
धियो हरिं वृषाचलोत्तमेतमेतमेत मे ॥ 14.25 ॥

त्रातुमप्रच्युता वारिजातेक्षणा
    त्वं नतात् ध्वस्तदेवारिजातेक्षणात्।
पातकादिन्दिरे पाहि मां शोभित -
    श्रीरघ ध्वान्तलोपा हिमांशोऽभितः ॥ 14.26 ॥

मन्दारा मन्दारा मन्दारा मन्दारात्
    व्याधिघ्ना दैत्यारेः शेषाद्रिं तं प्राप्ताः।
सारावा सारावा सारावा सारावा -
    गालीढा शृङ्गालीः यस्यार्तान् सन्त्रातुम् ॥ 14.27 ॥

शमदमौ मदमौढ्यहरौ वहन्
    मधुरिपुं धुरि पुण्यकृतां स्थितः।
विनमतीनमतीव तवार्चको
    निजगदं जगदम्ब जहाति च ॥ 14.28 ॥

जननि त्वया परिचरत्
    सुरकिन्नरकान्तया नयजुषा स्तुतया।
हृदि मे विना किमपि कृत्तनमन्
    नरकान्तया न यजुषा स्तुतया ॥ 14.29 ॥

त्वमेव सेव्याऽसि दृशैव ते स्थिरं
    रमे यतो यादवनायके बलम्।
उरो हि शौरेरुदधेस्त्वमग्रही
    रमेय तोयादवनाय केवलम् ॥ 14.30 ॥

सारसं श्रितवतीं ससारसं -
    माननां हिमकरोपमाननाम्।
देवतां प्रणमतो मुदेव तां
    वेदनादमहितां न वेदना ॥ **14.31** ॥

सा मयि देयादीक्षां
    रमार्त रक्षार्थमाददे या दीक्षाम्।
यत्पदजलजनतानाम्
    अपि सुगमं दिव्यधाम जलजनतानाम् ॥ **14.32** ॥

कमले राजीवानां
    कुले स्थिता त्वं गतिः परा जीवानाम्।
जगदाराध्या यन्ति
    श्रेयस्त्वां ये कृतादरा ध्यायन्ति ॥ **14.33** ॥

किमपि महोदारेषु
    प्रथमं मधुवैरिणो महो दारेषु।
जयति सपर्या यस्य
    स्थिरफलदात्री सुरद्रुपर्यायस्य ॥ **14.34** ॥

विधृतां हरिणाङ्केन
    त्वां प्रतिवददाननां हि हरिणाङ्केन।
प्रणमन् जननि बिडौजाः
    जनो भुवि स्यात् स्वबन्धुजननिबिडौजाः ॥ **14.35** ॥

कलशोदधिकन्या यं
    पश्यति विद्यात् स तावदधिकन्यायम्।
जितकथकवितानेन
    त्रयीविदा लभ्यते च कविताऽनेन ॥ **14.36** ॥

श्रीः सेवानरकेषु
    त्वयाऽर्थ्यतां हरिरिताढ्यवानरकेषु।
मां विनिपात्य न घोराः
    शुचो यथा नयति किन्तु पात्यन घोराः॥ **14.37** ॥

सततविकाराकल्पं
    प्राप्तोऽहं देहमम्ब काराकल्पम्।
कुभवादाशु भवत्या
    स्वयमुद्धार्यो रमे सदा शुभवत्या॥ **14.38** ॥

सारासाराज्ञान -
    स्थानेन किमस्ततेजसा राज्ञा नः।
श्रीस्त्वयि मानसमेतत्
    न्यस्येम विमुक्तयेऽभिमानसमेतम्॥ **14.39** ॥

व्यक्तिं विन्देमहि ताम्
    इन्द्रादिसुरैर्नवारविन्दे महिताम्।
मध्यमतारकवर्णे -
    ऽभिहिता या नखजितोरुतारकवर्णा॥ **14.40** ॥

हृतसदरिद्रव्याधिः
    श्रितजनमुच्छिन्नदुर्दरिद्रव्याधिः।
अतुलकृपा या देव -
    प्रणुता सा मां रमाऽत्र पायादेव॥ **14.41** ॥

शोषितभवनदयाग -
    स्तन्येशः कचजितोत्प्रभवनदयागः।
सोऽनभिभवनदयागः
    सोद्वाऽवति पद्मयाऽऽत्मभवनदयागः॥ **14.42** ॥

त्वां हि सुधी राजयति
    स्तुतां स्तवैर्यः प्रमानिधी राजयतिः।
भवति स धी राजयति
    श्रीः स्तंभभुवोऽत्र सोदधीरा जयति ॥ **14.43** ॥

भक्ततमानायतया
    दृक् तव कमले सुरोत्तमानायत या।
विश्रुतमानायतया
    शमय भवं श्रेयसेऽसमानाय तया ॥ **14.44** ॥

श्रीः परभागवतीयम्
    अभिष्टुता सा मुकुन्दभागवती यम्।
फणिवृषभागवतीयं
    पश्यति भजते पदं स भागवतीयम् ॥ **14.45** ॥

तृड्या तनयाचार्याः
    अहितेनान्तस्त्वयाऽब्धितनया चार्या।
त्वं चित्त न याचार्या
    प्रभृतीरितरा नमच्छ्रुतनयाचार्याः ॥ **14.46** ॥

मां हरिरामाऽऽयतया
    दृशा पुनात्वेनसां विरामाय तया।
प्रथिततरामायतया
    काकेऽप्यसुरे कृपां परामायतया ॥ **14.47** ॥

राशेर्वारामस्य
    श्रीस्त्वं दुहिताऽथ चोत्सवारामस्य।
अवनिभवा रामस्य
    प्रिया धियं नः सदोषवारामस्य ॥ **14.48** ॥

हरिसुरदारुण्ये नः
स्थितिमुषि वल्लिवदभूद्यदारुण्येन।
भृतवन्दारुण्येन
त्वीडे दैवतमसङ्गि दारुण्येन॥ **14.49** ॥

श्रीर्हितकरवाणी यान्
पश्यति तेभ्यो नमांसि करवाणीयान्।
हृतशोकरवाणीयान्
हातुमनर्थान् सुमप्रकरवाणीयान्॥ **14.50** ॥

महोदयाऽऽसारभुजात्वयातया
महोदया सारभुजा त्वया तया।
विलोपकारातिशयास्तदे विभा -
विलोपकारातिशयास्त देवि भा॥ **14.51** ॥

सुरक्षया देवहिता दृशावमा -
सुरक्षयादेव हि तादृशाऽव मा।
मुदा रमे धेहि गिरा विहानता -
मुदारमेधेऽहिगिराविहानता॥ **14.52** ॥

केवलं तुच्छविमता हरिणा क्षितवामताः।
के वलन्तु च्छविमता हरिणाक्षि तवामताः॥ **14.53** ॥

वैरस्य हानिदानेन मान्यासाध्येन साऽद्य तु।
वैरस्यहानिदानेन मान्या साध्येन सा द्यतु॥ **14.54** ॥

वृषाचलेऽशङ्करतोद्यमान -
वृषाचले शङ्करतोद्यमा न।
वृषाचलेशं करतोद्यमान
याम्बात्यजो वष्टि दृशो गिरस्ते॥ **14.55** ॥

राजीवायतना परत्र महतीं कुर्यान्मुदे नः कृपा
    राजीवायतनागबाहुरघ हृत् कृष्णो न देवोऽपरः।
रा जीवाय तनाविहापि सुखदा शुद्धा तयैवार्प्यते
    राजीवायत नायकं फणिगिरेर्याऽसौ दयास्रोतसाम्॥ **14.56** ॥

कौमारमारचयतः सफलं तपोऽस्य
    सा मारमारकनुतस्य वृषाचलेन्दोः।
रामा रमा रहितकोपतया कृतास्मत् -
    क्षेमारमारविसुधांशु जयत्यवन्याम्॥ **14.57** ॥

कलितमसारमनाशा -
    ध्यायामहितं न रामरामान्यम्।
कलितमसारमनाशा
    ध्यायाम हि तन्नरामरामान्यम्॥ **14.58** ॥

सारसेन महितापहारिका -
    सारसेनमहितापहारिका।
सारसेन महिताप हारिका -
    ऽनन्तगा जयति याऽनघा रमा॥ **14.59** ॥

त्वं गतिं जननि यच्छ वैभवी
    मा नयाऽमितरसा महो दया।
मानयामि तरसामहोदया
    मानयामितरसामहोदया॥ **14.60** ॥

मारमातरणिमानमस्यतां मा रमातरणिमानमस्यताम्।
मारमातरणिमानमस्यतां मारमातरणि मानमस्य ताम्॥ **14.61** ॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे यमकस्तबकः चतुर्दशः॥